# ૐ સાંય પ્રાર્થના ૐ

## ષટ્પદી

અવિનયમપનય વિષ્ણો દમય, મનઃ શમય વિષયમૃગતૃષ્ણામ ।
ભૂતદયાં વિસ્તારય તારય, સંસારસાગરતઃ ॥૧॥

દિવ્યધુનીમકરન્દે, પરિમલપરિભોગસચ્ચિદાનન્દે ।
શ્રીપતિપદારવિન્દે, ભવભયખેદચ્છિે વન્દે ॥૨॥

સત્યપિ ભેદાપગમે, નાથ તવાહં ન મામકીનસ્તવમ્ ।
સામુદ્રો હિ તરઙ્ગઃ ક્વચન, સમુદ્રો ન તારઙ્ગઃ ॥૩॥

ઉદ્ધૃતનગ નગભિદનુજ, દનુજકુલામિત્ર મિત્રશશિદૃષ્ટે ।
દૃષ્ટે ભવતિ પ્રભવતિ ન ભવતિ કિં, ભવતિરસ્કારઃ ॥૪॥

મત્સ્યાદિભિરવતારૈ-, રવતારવતાઽવતા સદા વસુધામ ।
પરમેશ્વર પરિપાલ્યો ભવતા, ભવતાપભીતોઽહમ્ ॥૫॥

દામોદર ગુણમન્દિર, સુન્દરવદનારવિન્દ ગોવિન્દ ।
ભવજલધિમથનમન્દર, પરમ દરમપનય ત્વં મે ॥૬॥

નારાયણ કરુણામય, શરણં કરવાણિ તાવકૌ ચરણૌ ।
ઈતિ ષટ્પદી મદીયે, વદનસરોજે સદા વસતુ ॥૭॥

## ગોવિંદ દામોદર સ્તોત્ર

કરારવિન્દેન પદારવિન્દં, મુખારવિન્દે વિનિવેશયન્તમ્ ।
વટસ્ય પત્રસ્ય પુટે શયાનં, બાલં મુકુન્દં મનસા સ્મારામિ ॥૧॥

શ્રીકૃષ્ણ ગોવિંદ હરે મુરારે, હે નાથ નારાયણ વાસુદેવ ।
જિહ્વે પિબસ્વામૃતમેતદેવ, ગોવિંદ દામોદર માધવેતિ ॥૨॥

વિક્રેતુકામા કિલ ગોપકન્યા, મુરારિપાદાર્પિતચિત્તવૃત્તિઃ ।
દધ્યાદિકં મોહવશાદવોચદ્,ગોવિંદ દામોદર માધવેતિ ॥૩॥

ગૃહે ગૃહે ગોપવધૂકદમ્બાઃ ।, સર્વે મિલિત્વા સમવાપ્ય યોગમ ।
પુણ્યાનિ નામાનિ પઠન્તિ નિત્યં, ગોવિંદ દામોદર માધવેતિ ॥૪॥

સુખં શયાના નિલયે નિજેઽપિ, નામાનિ વિષ્ણોઃ પ્રવદન્તિ મર્ત્યાઃ ।
તે નિશ્ચતં તન્મયતાં વ્રજન્તિ, ગોવિંદ દામોદર માધવેતિ ॥૫॥

જીહ્વે સદૈવ ભજ સુન્દરાણિ, નામાનિ કૃષ્ણસ્ય મનોહરાણિ ।
સમસ્ત ભક્તાર્તિવિનાશનાનિ, ગોવિંદ દામોદર માધવેતિ ॥૬॥

સુખાવસાને ઈદમેવ સારં, દુઃખાવસાને ઈદમેવ જ્ઞેયમ ।
દેહાવસાને ઈદમેવ જાપ્યં, ગોવિંદ દામોદર માધવેતિ ॥૭॥

શ્રીકૃષ્ણ રાધાવર ગોકુલેશ, ગોંપાલ ગોવર્ધનનાથ વિષ્ણો ।
જીહ્વે પિબસ્વામૃતમેતદેવ, ગોવિંદ દામોદર માધવેતિ ॥૮॥

## વૈદિક પ્રાર્થના

ૐ આ બ્રહ્મન્બ્રાહ્મણો બ્રહ્મવર્ચસી જાયતામ,
આઽસ્મિન રાષ્ટ્રે રાજન્યઃ ઈષવ્યઃ
શૂરો મહારથો જાયતામ્,
દોગ્ધ્રી ધેનુર્વોઢાઽવાનાશુ સપ્તિઃ,
પુરન્ધિર્યોષા જિષ્ણૂ રથેષ્ઠાઃ,
સભેયો યુવાસ્ય
યજમાનસ્ય વીરો જાયતામ્ ।

નિકામે નિકામે ન પર્જન્યો વર્ષતુ,
ફલિન્યો ન ઓષધયઃ પચ્યન્તાં
યોગક્ષેમો ન કલ્પતામ્ ॥

સમાની વઃ આકૂતિઃ, સમાના હ્રૃદયાનિ વઃ ।
સમાનમસ્તુ વો મનઃ, યથા વઃ સુસહાસતિ ॥

સર્વેઽત્ર સુખિનઃ સન્તુ, સર્વે સન્તુ નિરામયાઃ ।
સર્વે ભદ્રાણિ પશ્યન્તુ, મા કશ્ચિદ્ દુઃખમાપ્નુયાત્ ॥

ૐ શાંતિઃ શાંતિઃ શાંતિઃ ॥

## ષડ્દેવતા ગાયત્રી મંત્ર

ૐ એકદંતાય વિદ્મહે, વક્રતુંડાય ધીમહિ,
તન્નો દન્તી પ્રચોદયાત્ ॥૧॥

ૐ તત્પુરુષાય વિદ્મહે, મહાદેવાય ધીમહિ,
તન્નો રુદ્રઃ પ્રચોદયાત્ ॥૨॥

ૐ નારાયણાય વિદ્મહે, વાસુદેવાય ધીમહિ,
તન્નો વિષ્ણુઃ પ્રચોદયાત્ ॥૩॥

ૐ દેવ્યૈ બ્રહ્માણ્યૈ વિદ્મહે, મહાશક્ત્યૈ ચ ધીમહિ,
તન્નો દૈવી પ્રચોદયાત્ ॥૪॥

ૐ મહાલક્ષ્મી ચ વિદ્મહે, વિષ્ણુપત્નીમહિ ચ ધીમહિ,।
તન્નો લક્ષ્મીઃ પ્રચોદયાત્ ॥૫॥

ૐ ભાસ્કરાય વિદ્મહે, મહદ્યુતિકરાય ધીમહિ, ।
તન્નો આદિત્યઃ પ્રચોદયાત્ ॥૬॥